www.sgbauonline.com

AU- 2193

# M.A. (Part–II) Examination

## SANSKRIT

## Paper–I

## (Sahityashastra)

Time : Three Hours] [Maximum Marks: 100

सूचना :- उत्तराणि स्वीकृतभाषया लिखत ।

(काव्यप्रकाशः)

1. अधोलिखितेषु त्रयाणां सविवेचनम् अनुवादं कुरुत : 15

(i) काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।

(ii) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।
इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ।।

(iii) स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।
वाच्यादयस्तदर्थाः स्युः तात्पर्यार्थोऽपि केषुचित् ।।

(iv) मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ।।

(v) कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।।

(vi) अलंकारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ।।

2. टिप्पणित्रयं लिखत 15

(i) काव्यहेतुः ।

(ii) विवक्षितवाच्यः ।

(iii) रसस्वरूपम् ।

(iv) केचन पद्य पदगतदोषाः ।

(v) उपादान लक्षणा ।

(vi) काव्यभेदाः ।



www.sgbauonline.com

www.sgbauonline.com

3. काव्यप्रकाशस्य द्वितीयोल्लासमनुसृत्य लक्षणायाः स्वरूपं प्रतिपादयत । 10

किंवा

आचार्यमम्मटेन प्रतिपादितानां गुणानां विवेचनं कुरुत ।

(ध्वन्यालोकः)

4. अ. अधोलिखितेषु चतसृणां सविवेचनमनुवादं कुरुत : 12

(i) अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ।
अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम् ॥

(ii) रसभावतदाभासतत्प्रशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥

(iii) शृङ्गार एव मधुरः परः प्रह्लादनो रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥

(iv) ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः ।
रूपकादिरलङ्कारवर्ग एति यथार्थताम् ॥

(v) तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥

(vi) शब्दार्थशक्त्या क्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः ।
यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतेर्ध्वनेः ॥

(ब) टिप्पणीद्वयं लिखत : 8

(i) अङ्गिरसः

(ii) असंलक्ष्यक्रमव्यङ्ग्यध्वनिः

(iii) माधुर्यगुणान्विताः रसाः

(iv) रसवदलङ्कारः ।

(भामहकृत्-काव्यालंकारः)

5. अधोलिखितेषु चतुर्णां सविवेचनमनुवादं कुरुत : 20

(i) शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्द्विधा ।
संस्कृतं प्राकृतं चान्यद् अपभ्रंश इति त्रिधा ॥

(ii) धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ॥



www.sgbauonline.com

www.sgbauonline.com

(iii) माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः ।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते ॥

(iv) प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च ।
प्रसादि स्वभिधानं च यमकं कृतिनां मतम् ॥

(v) उपमानेन यत्तत्त्वमुपमेयस्य रूप्यते ।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः ॥

(vi) रसवद्दर्शितस्पष्टशृङ्गारादिरसं यथा ।
देवी समागमद्धर्ममस्करिण्यतिरोहिता ॥

6. केषाञ्चित् चतुर्णां विवेचनं कुरुत : 20

(i) विशिष्टा पदरचना रीतिः ।

(ii) माधुर्यसौकुमार्योपपन्ना पाञ्चाली ।

(iii) काव्यं ग्राह्यमलङ्कारात् ।

(iv) काव्यं सद्दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात् ।

(v) लोको विद्या प्रकीर्णञ्च काव्याङ्गानि ।

(vi) दण्डनीतेर्नयापनयौ ।

(vii) काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा ।



www.sgbauonline.com

www.sgbauonline.com

www.sgbauonline.com